# Shri Lakshminrisimhashtaksharamantraradhanam

# श्रीलक्ष्मीनृसिंहाष्टाक्षरमन्त्राराधनम्

## Document Information

Text title : Shri Lakshminrisimhashtaksharamantraradhanam

File name : lakShmInRRisiMhAShTAkSharamantrArAdhanam.itx

Category : vishhnu, dashAvatAra, lakShmI, mantra, narasiMhapurANa

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa, narasiMhapurANa | adhyAya

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# श्रीलक्ष्मीनृसिंहाष्टाक्षरमन्त्राराधनम्

श्रीगणेशाय नमः । श्रीलक्ष्मीनृसिंहाय नमः ।
अथ ध्यानम् ।
क्षीराब्धौ वसुमुख्यदेव निकरैरग्रादि संवेष्टितः ।
शङ्खचक्रगदाम्बुजं निजकरैर्बिभ्रंस्त्रिनेत्रासितः ॥ १॥

सर्पाधीश कृतान्तपत्रलसितः पीताम्बरालङ्कृतो ।
लक्ष्मीः श्लिष्टकलेवरो नृहरिस्तां नीलकण्ठो मुदे ॥ २॥

अष्टाक्षरेण देवेशं नरसिंहमनामयम् ।
गन्धपुष्पादिभिर्नित्यमर्चयेदच्युतं नरः ॥ ३॥

राजन्नष्टाक्षरो मन्त्रः सर्वपापहरः परः ।
समस्तयज्ञफलदः सर्वशान्तिकरः शुभः ॥ ४॥

ॐ नमो नारायणाय गन्धपुष्पादि सकलं मनेनैव निवेदयेत् ।
अनेनाभ्यर्चितो देवः प्रीतो भवति तत्क्षणात् ।
किं तस्य बहुभिर्मन्त्रैः किं तस्य बहुभिर्व्रतैः ।
ॐ नमो नारायणायेति मन्त्रः सर्वार्थसाधकः ॥ ५॥

इमं मन्त्रं जपेद्यस्तु शुचिर्भूत्वा समाहितः ।
सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥ ६॥

सर्व तीर्थफलं ह्येतत्सर्वतीर्थवरं नृप ।
हरेरर्चनमव्यग्रं सर्वयज्ञफलं नृप ॥ ७॥

तस्मात्कुरु नृपश्रेष्ठ प्रतिमादिषु चार्चनम् ।
दानानि विप्रमुख्येभ्यः प्रयच्छ विधिना नृप ॥ ८॥

एवं कृते नृपश्रेष्ठ नरसिंहप्रसादतः ।
प्राप्नोति वैष्णवं तेजो यत्काङ्क्षति मुमुक्षवः ॥ ९॥

पुरन्दरो राजनसि त्वं प्राप्तोऽपधर्मतः ।
तृणबिन्दुमुनेः शापान्मुक्तो ह्यष्टाक्षराज्जपात् ॥ १०॥

इति श्री नरसिंहपुराणे अष्टाक्षरमन्त्रः सम्पूर्णमस्तु ।

Proofread by M K Barman

---

*Shri Lakshminrisimhashtaksharamantraradhanam*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*